No. ४७४७

Title ब्रम्हाण्डपुराणेऽध्यात्मरामायणम्

Author *

Extent ३ पत्राणि Age *

Subject पुराण माहात्म्यादि

ब्रह्माण्ड पुराणे

अध्यात्मरामायणे प्रथमाध्यायः

४७४७

अ॰ रा॰
१

ॐ श्रीगणेशाय नमः ॥ ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १ ॥ जय
ति रघुवंशतिलकः कौशल्यानंदनो रामः ॥ दशवदननिधनकारी दाशरथिः पुंडरीकाक्षः ॥ २ ॥ सूत उवा
च ॥ कदाचिन्नारदो योगी परानुग्रहवांछया ॥ पर्यटन्सकलाँल्लोकान्सत्यलोकमुपागमत् ॥ ३ ॥ तत्र दृष्ट्वा मू
र्तिमद्भिश्छंदोभिः परिवेष्टितं ॥ बालार्कप्रभया सम्यग्भासयंतं सभागृहं ॥ ४ ॥ मार्कंडेयादिमुनिभिः स्तू
यमानं मुहुर्मुहुः ॥ सर्वार्थगोचरज्ञानं सरस्वत्या समन्वितं ॥ ५ ॥ चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदम् ॥
प्रणम्य दंडवद्भूमौ तुष्टाव मुनिपुंगवः ॥ ६ ॥ प्रसन्नस्तु मुनिं प्राह स्वयंभूर्वत्सवोत्तमं ॥ किं प्रष्टुकामस्त्वमसि
तद्वदिष्यामि ते मुने ॥ ७ ॥ इत्याकर्ण्य वचस्तस्य मुनिर्ब्रह्माणमब्रवीत् ॥ त्वत्तः श्रुतं मया सर्वं पूर्वमेव शुभाशुभं ॥ ८ ॥ इ
दानीमेकमेवास्ति श्रोतव्यं सुरसत्तम ॥ तद्रहस्यमपि ब्रूहि यदि तेनुग्रहो मयि ॥ ९ ॥ प्राप्ते कलियुगे घोरे नराः पुण्यविव
र्जिताः ॥ दुराचाररताः सर्वे सत्यवार्तापराङ्मुखाः ॥ १० ॥ परापवादनिरताः परद्रव्याभिलाषिणः ॥ परस्त्रीसक्तमनसः
परहिंसापरायणाः ॥ ११ ॥ देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः ॥ मातापितृकृतद्वेषाः स्त्रीदेवाः कामकिंकराः ॥ १२ ॥
विप्रा लोभग्रहग्रस्ता वेदविक्रयजीविनः ॥ धनार्जनार्थमभ्यस्तविद्यामदविमोहिताः ॥ १३ ॥ त्यक्तस्वजातिकर्माणः प्रा
यशः परवंचकाः ॥ क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागशीलिनः ॥ १४ ॥ तद्वच्छूद्राश्च ये केचिद्ब्राह्मणाचारतत्पराः ॥ स्त्रिय

राम
१

अध्यायश्रोत्र्यश्चैव ज्ञाननिर्भयाः॥१५॥ श्वशुरद्रोहकारिण्यो भविष्यंति न संशयः॥ एतेषां नष्टबुद्धीनां परलोकः क
थं भवेत्॥१६॥ इति चिंताकुलं चित्तं जायते मम संततं॥ लघूपायेन येनैषां परलोकगतिर्भवेत्॥१७॥ तमेवोपायमुपा पा४
ख्याहि सर्वं वेत्सि यतो भवान्॥ इत्येवं वाक्यमाकर्ण्य प्रत्युवाचांबुजासनः॥१८॥ साधु पृष्टं त्वया साध्वि वक्ष्ये तच्छृणु सादरं
॥पुरा त्रिपुरहंतारं पार्वती भक्तवत्सलं॥१९॥ श्रीरामतत्त्वजिज्ञासुः प्रपच्छ विनयान्विता॥ प्रियायै गिरिशस्तस्यै गू
ढं व्याख्यानवान्स्वयं॥२०॥ पुराणोत्तममध्यात्मरामायणमिति स्मृतं॥ तस्या पार्वती जगद्धात्री पूजयित्वा दिवानिशं॥२१
॥आलोचयंती स्वानंदमग्ना तिष्ठति सांप्रतं॥ प्रचरिष्यति तल्लोके प्राणहृष्टे वशाद्यदि॥२२॥ तस्याध्ययनमात्रेण जन
नाः पास्यंति सद्गतिं॥ तावद्विजृंभते पापं ब्रह्महत्यापुरस्सरं॥२३॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति॥ ता
वत्कलेर्महोत्साहा निःशंकं संप्रवर्त्तते॥२४॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति॥ तावत्सर्वाणि शास्त्राणि
विवदंते परस्परं॥२५॥ याश्चध्यात्मरामयणसंकीर्त्तनःश्रवणादिजं॥ तावद्यमभटाः क्रूराः संचरिष्यंति निर्भयाः
॥२६॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति॥ तावत्स्वरूपं रामस्य दुर्बोधं महतामपि॥२७॥ फलं वक्तुं न शक्को
मि कार्त्स्न्येन मुनिसत्तम॥ तथापि तस्य माहात्म्यं वक्ष्ये किंचित्तु वानघ॥२९॥ शृणु चित्तं समाधाय शिवेनोक्तं पुरा
मम॥ अध्यात्मरामायणतः श्लोकं श्लोकार्धमेव वा॥३०॥ यः पठेद्भक्तिसंयुक्तः स पापान्मुच्यते क्षणात्॥ यस्त्व

अ० रा०

स्य हृदयं ध्यात्मरामायणमनन्यधीः ॥ ३१ ॥ यथाशक्ति पठेद्भक्त्या स जीवन्मुक्त उच्यते ॥ यो भक्त्यार्चयते ध्यात्मरामायण
मतंद्रितः ॥ ३२ ॥ दिने दिनेऽश्वमेधस्य फलं तस्य भवेन्नृणे ॥ यद्दृष्ट्यापि प्रियो ध्यात्मरामायणमनादरात् ॥ ३३ ॥ श्रन्वतः
शृणुयान्मर्त्यः सोपि पापात्प्रमुच्यते ॥ नमस्करोति यो ध्यात्मरामायणमदूरतः ॥ ३४ ॥ सर्वदेवार्चनफलं स प्राप्नो
ति न संशयः ॥ लिखित्वा पुस्तके ध्यात्मरामायणमपोषतः ॥ ३५ ॥ यो दद्याद्रामभक्तेभ्यस्तस्य पुण्यफलं शृणु ॥ अ
धीतेषु च वेदेषु शास्त्रेष्वाकृतेषु च ॥ ३६ ॥ यत्फलं दुर्लभं लोके तत्फलं तस्य संभवेत् ॥ एकादशीदिने ध्यात्मरामा
यणमुपोषितः ॥ ३७ ॥ यो रामभक्तसदसि व्याकरोति नरोत्तमः ॥ तस्य पुण्यफलं वक्ष्ये शृणुवेत्सवसत्तम ॥ ३८ ॥ प्रस
त्यहं तु गायत्रीपुरश्चर्याफलं लभेत् ॥ उपवासव्रतं कृत्वा श्रीरामनवमीदिने ॥ ३९ ॥ रात्रौ जागरितो ध्यात्मरामाय
णमनन्यधीः ॥ यः पठेच्छृणुयाद्वापि तस्य पुण्यं वदाम्यहं ॥ ४० ॥ विप्रेभ्यो वाससी दत्त्वा भोजयित्वा यत्फलमश्नुते ॥ तत्फ
लं संभवेत्तस्य सत्यं सत्यं न संशयः ॥ ४१ ॥ यो गायति तथा ध्यात्मरामायणमहर्निशं ॥ ४२ ॥ आज्ञां तस्य प्रतीक्षन्ते दे
वा इन्द्रपुरोगमाः ॥ पठेत्प्रत्यहमध्यात्मरामायणमतंद्रितः ॥ ४२ ॥ यद्यत्करोति सत्कर्म तत्तत्कोटिगुणं भवेत् ॥ ४३
॥ तत्र श्रीरामहृदयं यः पठेत्सुसमाहितः ॥ स ब्रह्मघ्नोपि पूतात्मा त्रिभिरेव दिनैर्भवेत् ॥ ४४ ॥ श्रीरामहृदयं य
स्तु हनुमत्प्रतिमान्तिके ॥ त्रिः पठेत्प्रत्यहं मौनी स सर्वेप्सितभाग्भवेत् ॥ ४५ ॥ पठेच्छ्रीरामहृदयं तुलसस्वत्थयोर्य

श्रीराम ५ ॥ कुरुक्षेत्रादिनिखिलपुण्यतीर्थे
ष्वनेकशः ॥ आत्मतुल्यधनं सूर्यग्रहणे सोमसर्व
तोमखे ॥ ४७ ॥ श्रीरामचंद्रपमतेभ्यो नमः ॥

राम २

दिः प्रदक्षिणं प्रकुर्वीत ब्रह्महत्या निवर्त्तते ४६ श्रीरामगीतामाहात्म्यं कृत्स्नं जानाति शंकरः तदर्धं
गिरिजा वेत्ति तदर्धं वेद्म्यहं मुने ४७ तत्ते किंचित्प्रवक्ष्यामि कृत्स्नं वक्तुं न शक्यते यज्ज्ञात्वा तत्क्षणा
ल्लोकः शुभां बुद्धिमवाप्नुयात् ४८ श्रीरामगीता यत्पापं न नाशयति नारद तन्न नश्यति तीर्था
दौ लोके क्वापि कदाचन ४९ तन्न पश्याम्यहं लोके मार्गमाणोऽपि सर्वदा रामेणोपनिषत्सिन्धु
मुन्मथ्योत्पादितां मुदा ५० लक्ष्मणं प्रार्थितां गीतां सुधां पीत्वाऽमरो भवेत् जमदग्निसुतः
पूर्वं कार्त्तवीर्यवधेच्छया ५१ धनुर्विद्यामभ्यसितुं महेशस्यान्तिकेऽवसत् अधीयमानां
पार्वत्या रामगीतां प्रयत्नतः ५२ श्रुत्वा गृहीत्वा सुपठन् नारायणकलामगात् ब्रह्मह
त्यादि पापानां निष्कृतिं यदि वाञ्छति ५३ रामगीतां मासमात्रं पठित्वा मुच्यते नरः दुःप्र
तिग्रह दुर्भोज्य दुरालापादि सम्भवम् ५४ पापं संकीर्त्तनेनैव रामगीता विनाशयेत् शालि
ग्रामशिलाग्रे च तुलस्यश्वत्थसन्निधौ यतीनां पुरतस्तद्वद्रामगीतां पठेत्तु यः ५५ सततं
फलमवाप्नोति यद्वाचापि न गोचरम् रामगीतां पठन्यस्तु श्राद्धे संभोजयेद्द्विजान् ५६

अ० रामा० तस्यतेपितरःसर्वेयान्तिविष्णोःपरंपदम् एकादश्यांनिराहारोनियतोद्वादशीदिने ५७ स्थि
त्वाऽगस्त्यतरोर्मूलेरामगीतांपठेत्तुयः सएवराघवःसाक्षात्सर्वदेवैश्चपूज्यते ५८ विना
३ ध्यानंविनादानंविनातीर्थावगाहनं रामगीतांनरोऽधीत्यतदनन्तफलंलभेत् ५९ वहुना
किमिहोक्तेनशृणुनारदतत्त्वतः श्रुतिस्मृतिपुराणेतिहासागमशतानिच ६० अर्हन्ति
नाल्पमध्यात्मरामायणकलामपि ६१ अध्यात्मरामचरितस्यमुनीश्वरस्यमाहात्म्यमेत
दुदितंकमलासनेन यःश्रद्धयापठतिवाशृणुयात्तुमर्त्यः प्राप्नोतिविष्णुपदवींसुर
पूज्यमानः ६२ इतिश्रीब्रह्माण्डपुराणेउत्तरखण्डेहुशानोत्तरद्वादशसहस्र्यांसंहितायां
भविष्यकल्पनिर्णयेऽध्यात्मरामायणफलस्तुतिनामप्रथमोऽध्यायः ॥१॥ श्रीराम

राम ३